# Svami Vivekanandasam Stuti

# સ્વામિવિવેકાનન્દસંસ્તુતિઃ

## Document Information

Text title : Svami Vivekanandasam Stuti

File name : svAmivivekAnandasaMstutiH.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Author : Swami Balaramananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# સ્વામિવિવેકાનન્દસંસ્તુતિઃ

અખણ્ડં સચ્ચિદાનન્દં, પૂર્ણં બ્રહ્મસનાતનમ્ ।
આવિર્ભૂતં જગત્ ત્રાતું, સ્વામિનં તં નમામ્યહમ્ ॥ ૧॥

વીરેશ્વરઃ શિવઃ સાક્ષાત્, નરરૂપેણ રૂપિતમ્ ।
સેવાર્થમાર્ત્તદીનાનાં, સ્વામિનં તં નમામ્યહમ્ ॥ ૨॥

લીલાસહચરશ્રેષ્ઠં, ગુરુભક્તિ-પરાયણમ્ ।
ધ્યાનસિદ્ધં તપોનિષ્ઠં, સ્વામિનં તં નમામ્યહમ્ ॥ ૩॥

યોઽસ્તિ શ્રીરામકૃષ્ણસ્ય, દાસો જન્મનિ જન્મનિ ।
આગતસ્તસ્યકાર્યાર્થં, સ્વામિનં તં નમામ્યહમ્ ॥ ૪॥

યેનાવબોધિતં તત્ત્વં, શારદા-રામકૃષ્ણયોઃ ।
સારં ચ સર્વધર્માણાં, સ્વામિનં તં નમામ્યહમ્ ॥ ૫॥

શઙ્કરાચાર્યવદ્ યસ્મિન્, પ્રતિભાસ્તિ તથૈવ ચ ।
કારુણ્યં બુદ્ધદેવસ્ય સ્વામિનં તં નમામ્યહમ્ ॥ ૬॥

દેશદેશાન્તરં ગત્વા, સર્વે ધર્માઃ સમન્વિતાઃ ।
વેદાન્ત-દીપ-દ્રષ્ટારં, સ્વામિનં તં નમામ્યહમ્ ॥ ૭॥

અત્યન્ત પ્રાકૃતસ્યાપિ બોધનાર્થં સુખાય ચ ।
વ્યાખ્યાતો-વેદ-વેદાન્તઃ સ્વામિનં તં નમામ્યહમ્ ॥ ૮॥

આત્મનો મોક્ષલાભાર્થં, જગદ્ધિતાય હ્યેવ ચ ।
નવસંન્યાસિસઙ્ઘસ્ય, સ્થાપકં તં નમામ્યહમ્ ॥ ૯॥

મૂર્તિમન્તં મનુષ્યત્વં, નરેન્દ્ર ઇતિ સંજ્ઞિતમ્ ।
વન્દે નર ઋષિં દિવ્યં, વિવેકાનન્દ-રૂપિણમ્ ॥ ૧૦॥

વિશ્વસ્ય સર્વધર્માણાં, ધર્મગ્લાનિ-નિવારકમ્ ।
યુગાચાર્ય-વરિષ્ઠં તં, ભૂયો ભૂયો નમામ્યહમ્ ॥ ૧૧॥

માતા મે શારદાદેવી, રામકૃષ્ણઃ પિતા સ્વયમ્ ।
વિવેકાનન્દ-આચાર્યઃ, સર્વે ભક્તાશ્ચ બાન્ધવાઃ ॥ ૧૨॥

ઇતિ સ્વામિબલરામાનન્દવિરચિતા “વિવેકાનન્દસંસ્તુતિઃ” સમાપ્તા ।

Proofread by Aruna Narayanan

---

*Svami Vivekanandasam Stuti*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*